# ॥ गणेशबाह्यपूजा ॥

श्री गणेशाय नमः ॥
ऐल उवाच ॥
बाह्यपूजां वद विभो! गृत्समदप्रकीर्तिताम् ।
येन मार्गेण विघ्नेशं भजिष्यसि निरन्तरम् ॥ १॥
गार्ग्य उवाच ॥
आदौ च मानसीं पूजां कृत्वा गृत्समदो मुनिः ।
बाह्यां चकार विधिवत्तां श्रृणुष्व सुखप्रदाम् ॥ २॥
हृदि ध्यात्त्वा गणेशानं परिवारादिसंयुतम् ।
नासिकारन्ध्रमार्गेण तं बाह्यांग चकार ह ॥ ३॥
आदौ वैदिकमन्त्रं स गणानां त्वेति सम्पठन् ।
पश्चाच्छ्लोक समुच्चार्य पूजयामास विघ्नपम् ॥ ४॥
गृत्समद उवाच ॥
चतुर्बाहुं त्रिनेत्रं च गजास्यं रक्त वर्णकम् ।
पाशांकुशादि-संयुक्तं मायायुक्त प्रचिन्तयेत् ॥ ५॥
आगच्छ ब्रह्मणां नाथ सुरा-ऽसुर-वरार्चित ।
सिद्धि-बुद्ध्यादि-संयुक्त! भक्तिग्रहणलालस!॥ ६॥
कृतार्थोऽहं कृतार्थोऽहं तवागमनतः प्रभो ।
विघ्नेशाऽनुगृहीतोऽहं सफलो मे भवोऽभवत् ॥ ७॥
रत्नसिंहासनं स्वामिन् गृहाण गणनायक ।
तत्रोपविश्य विघ्नेश रक्ष भक्तान् विशेषतः ॥ ८॥
सुवासिताभिरद्भिश्च पादप्रक्षालनं प्रभो!।
शीतोष्णाम्भः करोमि ते गृहाण पाद्यमुत्तमम् ॥ ९॥
सर्वतीर्थाहृतं तोयं सुवासितं सुवस्तुभिः ।
आचमनं च तेनैव कुरूष्व गणनायक ॥ १०॥
रत्न-प्रवाल-मुक्ताद्यैरनर्घ्यैः संस्कृतं प्रभो ।
अर्घ्यं गृहाण हेरम्ब द्विरदानन तोषकम् ॥ ११॥
दधि-मधु-घृतैर्युक्तं मधुपर्कं गजानन ।
गृहाण भावसंयुक्तं मया दत्तं नमोऽस्तु ते ॥ १२॥
पाद्ये च मधुपर्के च स्नाने वस्त्रोपधारणे ।
उपवीते भोजनान्ते पुनराचमनं कुरू ॥ १३॥
चम्पकाद्यैर्गणाध्यक्ष वासितं तैलमुत्तमम् ।
अभ्यंगं कुरू सर्वेश! लम्बोदर! नमोऽस्तु ते ॥ १४॥

यक्ष-कर्दमकाद्यैश्च विघ्नेश भक्तवत्सल! ।
उद्वर्तनं कुरुष्व त्वं मया दत्तैर्महाप्रभो ॥१५॥
नानातीर्थजलैर्ढुण्ढे! सुखोष्णभावरूपकैः ।
कमण्डलूद्भवैः स्नानं कुरू ढुण्ढे समर्पितैः ॥१६॥
कामधेनु समद्भूतं पयः परमपावनम् ।
तेन स्नानं कुरुष्व त्वं हेरंब परमार्थवित् ॥१७॥
पंचामृतानां मध्ये तु जलैः स्नानं पुनः पुनः ।
कुरु त्वं सर्वतीर्थेभ्यो गंगादिभ्यः समाहृतैः ॥१८॥
दधि धेनुपयोद्भूतं मलापहरणं परम् ।
गृहाण स्नानकार्यार्थं विनायक दयानिधे ॥१९॥
धेनुदुग्धोद्भवं ढुण्ढे घृतं सन्तोषकारकम् ।
महामलापघातार्थं तेन स्नानं कुरू प्रभो ॥२०॥
सारघं सस्कृतं पूर्णं मधु मधुरसोद्भवम् ।
गृहाण स्नानकार्यार्थं विनायक नमोऽस्तु ते ॥२१॥
इक्षुदण्डसमुद्भूतां शर्करां मलनाशिनीम् ।
गृहाण गणनाथ त्वं तया स्नानं समाचर ॥२२॥
यक्षकर्दमकाद्यैश्च स्नानं कुरू गणेश्वर ।
अन्त्यं मलहरं शुद्धं सर्वसौगन्ध्यकारकम् ॥२३॥
ततो गन्धाक्षतादींश्च दूर्वांकुरान् गजानन ।
समर्पयामि स्वल्पांस्त्वं गृहाण परमेश्वर ॥२४॥
ब्रह्मणस्पत्यसूक्तैश्च ह्येकविंशतिवारकैः ।
अभिषेकं करोमि ते गृहाण द्विरदानन ॥२५॥
तत आचमनं देव सुवासितजलेन च ।
कुरुष्व गणनाथ त्वं सर्वतीर्थभवेन वै ॥२६॥
वस्त्रयुग्मं गृहाण त्वमनर्घ्यं रक्तवर्णकम् ।
लोकलज्जाहरं चैव विघ्ननाथ नमोऽस्तु ते ॥२७॥
उत्तरीयं सुचित्रं वै नभस्तारांकितं यथा ।
गृहाण सर्वसिद्धीश मया दत्तं सुभक्तितः ॥२८॥
उपवीतं गणाध्यक्ष गृहाण च ततः परम् ।
त्रैगुण्यमयरूपं तु प्रणवग्रन्थिबन्धनम् ॥२९॥
ततः सिन्दूरकं देव गृहाण गणनायक ।
अंगलेपनभावार्थं सदानन्दविवर्धनम् ॥३०॥
नानाभूषणकानि त्वमंगेषु विविधेषु च ।
भासुरस्वर्णरत्नैश्च निर्मितानि गृहाण भो ॥३१॥
अष्टगन्ध-समायुक्तं गन्धं रक्तं गजानन ।
द्वादशांगेषु ते ढुण्ढे लेपयामि सुचित्रवत् ॥३२॥

रक्तचन्दनसंयुक्तानथ वा कुंकुमैर्युतान् ।
अक्षतान् विघ्नराज त्वं गृहाण भालमण्डले ॥ ३३॥
चम्पकादि-सुवृक्षेभ्यः सम्भूतानि गजानन ।
पुष्पाणि शमी-मन्दार-दूर्वादीनि गृहाण च ॥ ३४॥
दशांग गुग्गुलं धूपं सर्वसौरभकारकम् ।
गृहाण त्वं मया दत्तं विनायक महोदर ॥ ३५॥
नानाजातिभवं दीप गृहाण गणनायक ।
अज्ञानमलजं दोषं हरन्तं ज्योतिरूपकम् ॥ ३६॥
चतुर्विधान्नसम्पन्नं मधुरं लड्डुकादिकम् ।
नैवेद्यं ते मया दत्त भोजनं कुरू विघ्नप ॥ ३७॥
सुवासितं गृहाणेदं जलं तीर्थ समाहृतम् ।
भुक्तिमध्ये च पानार्थं देवदेवेश ते नमः ॥ ३८॥
भोजनान्ते करोद्वर्तं यक्षकर्दमकेन च ।
कुरुष्व त्वं गणाध्यक्ष पिब तोयं सुवासितम् ॥ ३९॥
दाडिमं खर्जुरं द्राक्षां रम्भादीनि फलानि वै ।
गृहाण देवदेवेश नानामधुरकाणि तु ॥ ४०॥
अष्टांग देव ताम्बूलं गृहाण मुखवासनम् ।
असकृद्विघ्नराज त्वं मया दत्तं विशेषतः ॥ ४१॥
दक्षिणां कांचनाद्यां तु नानाधातुसमुद्भवाम् ।
रत्नाद्यैः संयुतां ढुंढे गृहाण सकलप्रिय ॥ ४२॥
राजोपचारकाद्यानि गृहाण गणनायक ।
दानानि तु विचित्राणि मया दत्तानि विघ्नप ॥ ४३॥
तत आभरणं तेऽहमर्पयामि विधानतः ।
विविधैरूपचारैश्च तेन तुष्टो भव प्रभो ॥ ४४॥
ततो दूर्वांकुरान् ढुंढे एकविंशतिसंख्यकान् ।
गृहाण कार्यसिद्ध्यर्थं भक्तवात्सल्यकारणात् ॥ ४५॥
नानादीपसमायुक्तं नीराजनं गजानन ।
गृहाण भावसंयुक्तं सर्वाज्ञानादिनाशन ॥ ४६॥
गणानां त्वेति मन्त्रस्य जपं साहस्रकं परम् ।
गृहाण गणनाथ त्वं सर्वसिद्धिप्रदो भव ॥ ४७॥
आर्तिक्यं च सुकर्पूरं नानादीपमयं प्रभो ।
गृहाण ज्योतिषां नाथ तथा नीराजयाम्यहम् ॥ ४८॥
पादयोस्ते तु चत्वारि नाभौ द्वे वदने प्रभो ।
एकं तु सप्तवारं वै सर्वांगेषु निरंजनम् ॥ ४९॥
चतुर्वेदभवैर्मन्त्रैर्गाणपत्यैर्गजानन ।
मन्त्रितानि गृहाण त्वं पुष्पपत्राणि विघ्नप ॥ ५०॥

पंचप्रकारकैः स्तोत्रैर्गाणपत्यैर्गणाधिप ।
स्तौमि त्वां तेन सन्तुष्टो भव भक्तिप्रदायक ॥ ५१॥
एकविंशतिसंख्यं वा त्रिसंख्यं वा गजानन ।
प्रादक्षिण्यं गृहाण त्वं ब्रह्मन् ब्रह्मेशभावन ॥ ५२॥
साष्टांगा प्रणतिं नाथ एकविंशतिसम्मिताम् ।
हेरम्ब सर्वपूज्य त्वं गृहाण तु मया कृताम् ॥ ५३॥
न्यूनातिरिक्तभावार्थं किंचिद् दुर्वांकुरान् प्रभो ।
समर्पयामि तेन त्वं सांगां पूजां कुरूष्व ताम् ॥ ५४॥
त्वया दत्तं स्वहस्तेन निर्माल्यं चिन्तयाम्यहम् ।
शिखायां धारयाम्येव सदा सर्वप्रदं च तत् ॥ ५५॥
अपराधानसंख्यातान् क्षमस्व गणनायक ।
भक्तं कुरु च मां ढुंढे तव पादप्रियं सदा ॥ ५६॥
त्वं माता त्वं पिता मे वै सुहृत्सम्बन्धिकादयः ।
त्वमेव कुलदेवश्च सर्वं त्वं मे न संशयः ॥ ५७॥
जाग्रत्-स्वप्न-सुषुप्तिभिर्देह-वांग्मनसैः कृतम् ।
सांसर्गिकेण यत्कर्म गणेशाय समर्पये ॥ ५८॥
ब्राह्मं नानाविधं पापं महोग्रं तल्लयं व्रजेत् ।
गणेशपादतीर्थस्य मस्तके धारणात् किल ॥ ५९॥
पादोदकं गणेशस्य पीतं मर्त्येण तत्क्षणात् ।
सर्वांतर्गतजं पापं नश्यति गणनातिगम् ॥ ६०॥
गणेशोओच्छिष्टगन्धं वै द्वादशांगेषु चर्चयेत् ।
गणेशतुल्यरूपः स दर्शनात् सर्वपापहा ॥ ६१॥
यदि गणेशपूजादौ गन्धभस्मादिकं चरेत् ।
अथवोच्छिष्टगन्धं तु नो चेत्तत्र विधिं चरेत् ॥ ६२॥
द्वादशांगेषु विघ्नेशं नाममन्त्रेण चाऽर्चयेत् ।
तेन सोऽपि गणेशेन समो भवति भूतले ॥ ६३॥
आदौ गणेश्वरं मूर्ध्नि ललाटे विघ्ननायकम् ।
दक्षिणे कर्णमूले तु वक्रतुण्डं समर्चयेत् ॥ ६४॥
वामे कर्णस्य मूले वै चैकदन्तं समर्चयेत् ।
कण्ठे लम्बोदरं देवं हृदि चिन्तामणिं तथा ॥ ६५॥
बाहौ दक्षिणके चैव हेरंबं वामबाहुके ।
विकटं नाभिदेशे तु विघ्ननाथं समर्चयेत् ॥ ६६॥
कुक्षौ दक्षिणगायां तु मयूरेशं समर्चयेत् ।
वामकुक्षौ गजास्यं वै पृष्ठे स्वानन्दवासिनम् ॥ ६७॥
सर्वांगलेपनं शस्तं चित्रितं चाऽष्टगन्धकैः ।
गाणेशानां विशेषेण सर्वभद्रस्य कारणात् ॥ ६८॥

ततोच्छिष्टं तु नैवेद्यं गणेशस्य भुनज्म्यहम् ।
भुक्ति-मुक्तिप्रदं पूर्णं नानापापनिकृन्तनम् ॥ ६९॥
गणेशस्मरणेनैव करोमि कालखण्डनम् ।
गाणपत्यैश्च संवासः सदाऽस्तु मे गजानन ॥ ७०॥
गार्ग्य उवाच ॥
एवं गृत्समदश्चैव चकार बाह्यपूजनम् ।
त्रिकालेषु महायोगी सदा भक्तिसमन्वितः ॥ ७१॥
तथा कुरु महीपाल गाणपत्यो भविष्यसि ।
तथा गृत्समदः साक्षात्तथा त्वमपि निश्चितम् ॥ ७२॥
इति श्रीमदान्त्ये मुद्गलपुराणे गणेशबाह्यपूजा समाप्ता ॥

proofread by Karthik Chandan.P (kardan5380@yahoo.com)
and Amith K Nagaraj (amithkn@rediffmail.com)

---

Please send corrections to sanskrit@cheerful.com
Last updated April 5, 2004